नित्यं नित्यमाप्याययन्ति च। दिव्यानां पार्थिवानाञ्च नैशानाञ्चैव सर्वशः। आदानान्नित्यमादित्यस्तेजसा तमसां प्रभुः। आदत्ते स तु नाड़ीनां सहस्रेण समन्ततः। नादेयांश्चैव सामुद्रान् कूपांश्चैव सहस्रकम्। स्थावरान् जङ्गमांश्चैव यच्च कुल्यादिकं पयः। तस्य रश्मिसहस्रन्तु शीतवर्षोष्णनिस्रवम्। तासां चतुःशतं नाड्यो वर्षन्ते चित्रमूर्त्तयः। चन्दनाश्चैव वाह्याश्च कौतनाभूतनास्तथा। अमृता नामतः सर्वा रश्मयो वृष्टिसर्जनाः। हिमोद्वहाश्च तामस्यो रश्मयस्त्रिशतं पुनः। वश्यो मेध्यश्च पैध्यश्च ह्लादिन्यो हिमसर्जनाः। चन्द्रास्ता नामतः सर्वाः पीताभाः स्युर्गभस्तयः। शुक्राश्च ककुभश्चैव गावो विश्वभृतस्तथा। शुक्रास्ता नामतः सर्वास्त्रिविधा घर्मसर्जनाः। समं बिभर्त्ति ताभिः स मनुष्यपितृदेवताः। मनुष्यानौषधेनेह स्वधया च पितॄनपि। अमृतेन सुरान् सर्वान् त्रिषु त्रींस्तर्पयत्यसौ। वसन्ते ग्रीष्मके चैव शतैः सन्तपति त्रिभिः। शरद्यपि च वर्षासु चतुर्भिः स प्रवर्षति। हेमन्ते शिशिरे चैव हिमसुत्सृजति त्रिभिः। वरुणो१ माघमासे तु सूर्य्यः पूषा२ तु फाल्गुने। चैत्रे३ मासि भवेदीशो धाता४ वैशाखतापनः। ज्यैष्ठमासे भवेदिन्द्र५ आषाढ़े सविता६ रविः। विव७स्वान् श्रावणे मासि प्रौष्ठपद्यां भगः८ स्मृतः। पर्जन्यो९ऽश्वयुजि त्वष्टा१० कार्त्तिके मासि भास्करः। मार्गशीर्षे भवेन्मित्रः११ पौषे विष्णुः सनातनः। पञ्चरश्मिसहस्राणि वरुणस्यार्ककर्मणि। षड्भिः सहस्रैः पूषा तु देवेशः सप्तभिस्तथा। धाता ष्टभिः सहस्रैस्तु नवभिस्तु शतक्रतुः। विवस्वान् दशभिः पाति पात्येकादशभिर्भगः। सप्तभिस्तपते मित्रस्त्वष्टा चैवाष्टभिस्तपेत्। अर्य्यमा दशभिः पाति पर्जन्यो नवभिस्तपेत्। षड्भीरश्मिसहस्रैस्तु विष्णुस्तपति विश्वसृक्। वसन्ते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसंप्रभः। श्वेतो वर्षासु वर्णेन पाण्डुरः शरदि प्रभुः। हेमन्ते ताम्रवर्णः स्यात् शिशिरे लोहितो रविः। ओषधीषु बलं धत्ते स्वधामपि पितृष्वथ। सूर्य्योऽमरत्वममृतत्रयं त्रिषु नियच्छति। अन्ये चाष्टौ ग्रहाः ज्ञेयाः सूर्य्येणाधिष्ठिता द्विजाः!। चन्द्रमाः सोमपुत्रश्च शुक्रश्चैव बृहस्पतिः। भौमो भानुसुतो राहुः केतुमानपि चाष्टमः। सर्वे ध्रुवे निबद्धा ये ग्रहास्ते वातरश्मिभिः। भ्राम्यमाणा यथायोगं भ्रमन्त्यनुदिवाकरम्”।

**रस** स्वने भ्वा० प०अक०सेट्। रसति अरासीत् अरसीत्। ररास रेसतुः।

**रस** आस्वादे अ०चु० उ० सक० सेट्। रसयति ते अररसत् त

**रस** पु० रस्यते रस–अच्। आस्वाद्यो रसनेन्द्रियग्राह्ये १मधुर्य्यादिगुणभेदे २देहस्थे भुक्तान्नादेः प्रथमपरिणामे ३सारे च “ओषधीनां रसः” इति ताण्ड्यब्रा० “रसः सारः” भा०। ४धातुभेदे पारदे ५माधुर्य्यादरसवति गुडादौ त्रि० ६पुष्पस्य मधुनि ७अलङ्कारोक्ते विभावानुभावसञ्चारिकाभावव्यङ्ग्ये रत्यादिस्थायिभावके शृङ्गारादौ। ८विषे ९वीर्य्ये १०रागे ११द्रवे अमरः १२जले च १३गन्धरसे पुंन० मेदि० १४षन्ने च निघण्टुः।

पारदशब्दे ४३११ पृष्ठादौ रसशोधनादि दृश्यम्।

देहस्थधातुहेतुरसस्वरूपादि भावप्र० उक्तं यथा “यस्माधो रसधातुर्यस्ततोऽभवदपां रसः। सद्रवं सकलं देहं रसतीति रसः स्मृतः।” अथ रसस्य स्वरूपमाह “सम्यक् पक्वस्य भुक्तस्य सारो निगदितो रसः। स तु द्रवः सितः शीतः स्वादुः स्निग्धश्चलो भवेत्। सारो यथा गुडमधूकपुष्पवकुलत्वगबदरीमूलादिभवः सारो मदिरा। अथ रसस्य स्थानमाह “सर्वदेहचरस्यापि रसस्य हृदयं स्थलम्। समानमरुता पूर्वं यदयं हृदये धृतः।” अथ रसस्य कर्माण्याह “आरुह्य धमनीर्गत्वा धातून् सर्वानयं रसः। पुष्णाति तदनु स्वीयैर्व्याप्नोति च तनुं गुणैः।” गुणैः शीतस्निग्धपोषकत्वगुणैः शीतस्निग्धपोषकत्वैः “मन्दवह्निविदग्धस्तु कट्वम्लो भवेद्रसः। स कुर्य्याद्बहुलान् रोगान् विषत्वं करोत्यपि।” अम्लकरशब्दे दृश्यम्।

अलङ्कारशास्त्रोक्तो रसो नवविधः। “शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्सोऽद्भुत इत्यष्टौ रसा शान्तस्तथा मतः।” सा० द० तल्लक्षणं तत्रैव यथा “विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायी भावः सचेतसाम्”। “विभावादयो वक्ष्यन्ते। सात्त्विकाश्चानुभावरूपत्वात् न पृथगुक्ताः। व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतः व्यक्तीकृत एव रसो न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते। तदुक्तं लोचनकारैः “रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद्व्यवहार इति”। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे पुनः स्थायिपदोपानं रत्यादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम्। ततश्च हासक्रोधादयः